# Ribhuproktam Brahmaikarupatvanirupanam

# ઋભુપ્રોક્તં બ્રહ્મૈકરૂપત્વનિરૂપણમ્

## Document Information

Text title : Ribhuproktam Brahmaikarupatvanirupanam

File name : RRibhuproktaMbrahmaikarUpatvanirUpaNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 30| 3-54||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તં બ્રહ્મૈકરૂપત્વનિરૂપણમ્

(સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ)
અહં સત્યઃ પરાનન્દઃ શુદ્ધો નિત્યો નિરઞ્જનઃ ।
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૩॥

અન્તરજ્ઞાનશુદ્ધોઽહમહમેવ પરાયણમ્ ।
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૭॥

અનેકતત્ત્વહીનોઽહં એકત્વં ચ ન વિદ્યતે ।
(અહમેકત્ત્વહીનોઽહં એકત્વં ચ ન વિદ્યતે ।)
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૮॥

સર્વપ્રકારરૂપોઽસ્મિ સર્વં ઇત્યપિ વર્જિતઃ ।
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૯॥

દ્વૈતાદ્વૈતં સુખં દુઃખં લાભાલાભૌ જયાજયૌ ।
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૧૭॥

અજ્ઞાનં ચૈવ નાસ્ત્યેવ તત્કાર્યં કુત્ર વિદ્યતે ।
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૨૦॥

અહઙ્કારં બહુવિધં દેહોઽહમિતિ ભાવનમ્ ।
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૨૩॥

બ્રહ્માહમપિ કાણોઽહં બધિરોઽહં પરોઽસ્મ્યહમ્ ।
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૨૪॥

દેહોઽહમિતિ તાદાત્મ્યં દેહસ્ય પરમાત્મનઃ ।
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૨૫॥

એવમેવ સદાપૂર્ણો નિરીહસ્તિષ્ઠ શાન્તધીઃ ।
સર્વં બ્રહ્માસ્મિ પૂર્ણોઽસ્મિ એવં ચ ન કદાચન ॥ ૩૦.૩૬॥

સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ।
લક્ષ્યલક્ષણભાવં ચ દૃશ્યદર્શનદૃશ્યતા ॥ ૩૦.૩૯॥

અત્યન્તાભાવમેવેતિ સર્વદાનુભવં મહત્ ।
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૪૦॥

એક એવ પરો હ્યાત્મા એકત્વભ્રાન્તિવર્જિતઃ ।
સર્વં બ્રહ્મ સદા બ્રહ્મ તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૪૫॥

ધ્યાનયોગં રાજયોગં ભોગમષ્ટાઙ્ગલક્ષણમ્ ।
સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ॥ ૩૦.૫૦॥

સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ।
બ્રહ્મૈવાહં પ્રસન્નાત્મા બ્રહ્મૈવાહં ચિદવ્યયઃ ॥ ૩૦.૫૨॥

સર્વં બ્રહ્મ ન સન્દેહસ્તદ્બ્રહ્માહં ન સંશયઃ ।
બ્રહ્મૈવાહં પ્રસન્નાત્મા બ્રહ્મૈવાહં ચિદવ્યયઃ ॥ ૩૦.૫૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તઃ બ્રહ્મૈકરૂપત્વનિરૂપણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૩૦। ૩-૫૪॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 30. 3-54..

Notes :
Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.
Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

*Ribhuproktam Brahmaikarupatvanirupanam*
pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*